कर्णभूषणम्

(एकाङ्किनाटक-शोकगीति-प्रबन्धात्मकरचनात्रयम्)

रचयिता
डॉ० सी० आर० स्वामिनाथन्

प्रकाशिका
देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नवी दिल्ली-११००५९
(भारतम्)

कर्णभूषणम्

(एकाङ्किनाटक-शोकगीति-प्रबन्धात्मकरचनात्रयम्)

रचयिता

डॉ० सी० आर० स्वामिनाथन्

प्रकाशिका

देववाणी-परिषद्, दिल्ली

६, वाणी-विहारः, नयी दिल्ली-११००५९

(भारतम्)

कर्णभूषणम्

(एकाङ्किनाटक-शोकगीति-प्रबन्धात्मकरचनात्रयम्)

रचयिता : डॉ० सी० आर० स्वामिनाथन्

© : लेखकः

प्रकाशिका : देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः, नई दिल्ली-११००५९ (भारतम्)

मुद्रकः : देव प्रिण्टर्स,
२६५ उत्तरी गांधी कालौनी, मुजफ्फरनगरम्-२५१००१

संस्करणं : प्रथमम्, १९८० ई०

प्रतिरूपाणि: ४००

मूल्यम् : रु० १५=०० पंचदश रूप्यकाणि (सजिल्दस्य)
रु० ५=०० पञ्च रूप्यकाणि (पेपरबैकस्य)

KARNABHŪSANAM

(One Act Play, Elegy & Prabandham)

Author : Swaminathan, (Dr.) C. R.

© : Author

Publisher : Devavani Parishad, Delhi
6, Vani Vihar, New Delhi-110059 (India)

Printer : Dev Printers,
265-North. Gandhi Colony, Muzaffarnagar.

Edition : First, 1980

Copies : 400

Price : Rs. 15=00 (Bound)
Rs. 5=00 (Paper Back)

विषय-सूची

	लेखः	लेखकः	पृष्ठाङ्कः
१.	डॉ०सी०आर०स्वामिनाथकृत रचनात्रयस्य समीक्षणम्	: डॉ०रमाकान्त शुक्लः	६७–६९
२.	कर्णभूषणम् (एकांकिनाटकम्)	: डॉ०सी०आर०स्वामिनाथः	७०–७७
३.	ध्वस्तं कुसुमम् (शोकगीतिः)	: ,,	७८–८२
४	नरबलिप्रबन्धः (प्रबन्धः)	: ,,	८३–८८

प्रस्तावना

डॉ० सी० आर० स्वामिनाथस्य 'कर्णभूषणम्', 'ध्वस्तं कुसुमम्' 'नरबलिप्रबन्धश्चे'ति तिस्त्रो रचना अवलम्ब्य संक्षिप्तो विचारविमर्शः क्रियते ।

कर्णभूषणम्

'कर्णभूषणम्' एकाङ्किनाटकमस्ति । अत्र वस्तु प्रख्यातमस्ति । पौराणिकप्रसिद्ध्यनुसारं कर्णः सूर्यसुत आसीत् सूर्येण च सः प्रबोधित आसीदिति वस्तुनः प्रख्यातता । अत्र च पात्राणां न बाहुल्यम् । केवलं पात्रद्वयमेव विद्यते । रसश्च दानवीरोऽत्र । केवलमेक एवाङ्को विलसति । पाश्चात्यनाट्यालोचकमता स्थानकार्यदेशान्वितिरपि स्पष्टं प्रतिभासते । संवादानां पात्रानुकूलत्वमवसरानुकूलत्वं चास्ति । अस्याभिनयार्थं न कश्चिद्विशिष्टो रंगमञ्चोऽपेक्ष्यते । यदि कश्चिन्नाट्यनिदेशकः कटकदृश्यार्थं तानि तानि वस्तूनि स्थापयितुमिच्छति तर्हि स एतत्कर्तुं स्वतन्त्रः, यदि नास्ति अभिनयकर्तृणां पार्श्वे सम्भारप्राचुर्यं तदा साधारणेऽपि मञ्चेऽस्याभिनयः कर्तुं पार्यते । विना जवनिकामप्यस्यैकाङ्किनोऽभिनयः कर्तुं शक्यते । रेडियोनाटकरूपेणाप्यस्य प्रस्तुतिः सर्वथा शक्या । तत्र हि चारुत्वसृष्ट्यर्थं 'फ्लैशबैकपद्धत्या' कर्णोत्पत्तिप्रसंगोऽपि प्रस्तोतुं शक्यते ।

श्लोकानामुच्चारणं महाराष्ट्रीयसंगीतकपद्धत्यापि कर्त्तुं शक्यते । सस्वरश्लोकपाठकर्तृनटाभावे सारोहावरोहं गद्यरूपेणापि श्लोकपाठोऽनुमतः स्यात् ।

यद्यपि संवादप्रधानमिदं नाटकं तथापि निदेशककौशलात्कार्य (Action)-योजनमपि कर्तुं शक्यते ।

ध्वस्तं कुसुमम्

संस्कृतसाहित्ये 'एलिजी'-काव्यानां नास्ति बाहुल्यम्। डॉ० त्र्यम्बकगोविन्द-माइणकरकृत'स्मृतितरङ्ग'-प्रभृतयः काश्चनैव शोकगीतयः संस्कृतकाव्यक्षेत्रे दृष्टिपथमवतरन्ति। डॉ० स्वामिनाथकृतं 'ध्वस्तं कुसुमम्' अस्मिन् क्षेत्रे नवोपहाररूपेण समुल्लसति।

ध्वस्तकुसुमरचनायाः प्रेरणामवलम्ब्य कविनैव काव्यारम्भे संकेतितम्। मया साकमपि तस्य वार्ता जाता। तदनुसारम्, उत्तरभारतस्यैकस्मिन् नगरे कश्चिद् दाक्षिणात्यो युवा शासकीयपदमधितिष्ठति स्म। स हि 'आई. ए. एस.' इत्युपाधिसमलंकृत आसीत्। तत्रैव काचित्काश्मीरिकपण्डितकुलोद्भवा बाला तस्मिन्ननुरक्ता। द्वयोरपि प्रेम समजनि। विवाहार्थं प्रथमं वरपक्षीया गुरवोऽसहमता आसन् किन्तु कवेरेव प्रयत्नेन पुनस्ते सहमता बभूवुः। यस्मिन् दिने स युवा पित्रोराशिषं गृहीत्वा जीपमारुह्य कन्यायै विवाहानुमतिरूपशुभसन्देशं दातुं समायाति स्म तस्मिन्नेव दिने मार्गे स दुर्घटनाग्रस्तो भूत्वा पञ्चत्वं गतः। कविना यदायमुदन्तः श्रुतस्तदा सः भावविह्वलः संजातः। तस्य भावोद्रेकः 'ध्वस्तकुसुम'-रूपेणाभिव्यक्तः।

रचनेयं रसानुकूलप्रसादगुणोपेता। नात्र कवेर्विकटबन्धनिर्बन्धपरता दृश्यते। नात्र केवलमितिवृत्तमात्रनिर्वाहेच्छा अपितु तद्व्याजेन सुकुमारभावोद्गिरणेच्छा कवेः दृश्यते। अन्ते च कवेरास्तिकता व्यज्यते।

नरबलिप्रबन्धः

'नरबलिप्रबन्धः' केरलेषु चाक्यारनटानामुपयोगाय रचितानां प्रबन्धभिधानानां गद्यपद्यात्मकलघुकाव्यानां परम्परायामभिनवः प्रयोगः। डॉ० स्वामिनाथः केरलरत्नभूतोऽस्ति, अतस्तत्साहित्यपरम्परायाः वर्धनं कर्त्तुमस्य नैसर्गिकी प्रवृत्तिरुचितैव।

प्रबन्धस्य प्रस्तुतिः केनचिदनुरूपपदवाक्योच्चारणज्ञेन हावभावप्रदर्शकेन वाचकेन क्रियते। तेन विकटबन्धोच्चारणज्ञेन रसव्यक्तिसमर्थेन च भाव्यम्। नरबलिप्रबन्धस्य रचना 'प्रबन्ध' प्रस्तुत्यनुसारमेव कृतास्ति।

अस्य कथानकं नेपालदेशजनानुश्रुतिमनुसृत्योपन्यस्तम्। कविना स्वकल्पना-

कौशलं यत्र तत्र चारु प्रदर्शितम्, अन्ते च भक्तिभावस्योदयः कृतः।

ओजोगुणमयी समस्तपदशय्या अवलोकनीया विद्यते। तोटकच्छन्दसः प्रयोगस्त्वतीव गतिमान्। दुर्गास्तुतिप्रसंगे शार्दूलविक्रीडितमतीव समीचीनतया प्रयुक्तम्।

शीर्षकोऽस्ति समुत्सुकतावर्धनकरः। प्रबन्धान्तं यावच्छ्रोता समुत्सुकस्तिष्ठति, किन्तु कविः स्वकौशलेन श्रोतृशंकितां बीभत्सतां समुदेतुं नानुमन्यते।

डॉ० स्वामिनाथमहाभागस्य 'बदरिकेश्वरसुप्रभातस्तोत्रम्', 'जीर्णोपधानम्', अन्याश्च प्रकीर्णा रचना अपि सन्ति यासां विषयेऽवसरानुसारमन्यत्र चर्चा कृता स्यात्। अत्र समीक्षितं रचनात्रयमग्रे मूलरूपेण दीयते।

डॉ० सी० आर० स्वामिनाथमहाभागः सादरमभिनन्द्यते यो हि शासकीयपदमार्यधितिष्ठन् सुरभारतीसपर्यायां सोल्लासं समोदं च दत्तावधानोऽस्ति। 'देववाणी–परिषद्, दिल्ली' संस्था महानुभावस्याय कृतज्ञतामावहति यदनेन स्वकृतीनां प्रकाशनमतोऽनुमतम्।

६ वाणी-विहारः
नयी दिल्ली–११००५९
१५–७–१९८०

—रमाकान्त शुक्लः
महासचिवः
देववाणी–परिषद्, दिल्ली

डॉ० सी० आर० स्वामिनाथकृतम्

कर्णभूषणम्

(एकाङ्किनाटकम्)

(नेपथ्ये सूत्रधारः)

कर्णामृतं यस्य कथाप्रसङ्गं
व्यासश्चकार स्ववचोविशुद्ध्यै ।
अव्यात्स वः कारणमर्त्यरूपा–
पार्थप्रियो भारतसूत्रधारः ॥

(तत्र प्रविशति कुरुक्षेत्रपरिसरवर्तिनि स्वकटके निषण्णोऽङ्ग–राजः कर्णः । अर्धरात्रौ दीपज्वालायाः पुरतः)

कर्णः (आसनादुत्थाय सामर्षम्) कोऽयं शैलूषहतकः यो मन्नामोच्चारणच्छ-लेन कपटनाटकसूत्रधारं गोपिकाजारं स्तौति ? अथवा, अस्थान–प्रयुक्तस्तुतिवचनाः खलु परपिण्डोपजीविनो नटाः । अलमनेन विक–त्थनवृत्तेवृथान्वेषणेन । यदेतादृशेषु प्रवृत्तः कोपोऽप्यस्मादृशां लाघवाय कल्पते । नाऽयं कुशीलवापसदः कीर्त्तनीयचरित्रं सुयोधनमहाराजं स्तुत्यतमं वेत्ति । दानशौण्डमपि मे मनो यस्यौदार्यं स्मारं स्मारमसाध्य-प्रत्युपकारितया सलज्जं भवति । यतः

अङ्गाधिपत्वमधुनाऽऽहवधूर्वहत्वं
ताराधिपान्वयसमां पुनराढ्यतां च ।
प्राप्तोऽस्मि येन कुरुपुङ्गव सौहृदेन
कार्तज्ञताऽस्य मम जीवितलक्ष्यभूता ॥

(दूरतो दत्तदृष्टिः) अये कोऽयं मामुपसर्पति ? न सैनिकेष्वन्यतमः यतोऽकञ्चुकच्छन्नमस्य गात्रम् (सूक्ष्मं निरूप्य) आम् ! विभावितम्,

शिखायज्ञोपवीताभ्यां ब्राह्मण एव कोऽपि। लोभमात्सर्यद्वेषादिभिः पिशितलोलुपैर्गृध्रैरिवान्धकारायितामिमां रणभुवं निजब्रह्मवर्चसेन सन्दीपयन्नित एवागच्छति।

स्फुरन्मुखाभः स्फुरिताधरोष्ठ-
स्त्वरानुमेयक्षुभितान्तरङ्गः ।
मामभ्यगच्छत्यवनीसुरः कोऽ
प्यदामयोग्ये कटके निविष्टम् ।

(ततः प्रविशति यथानिर्दिष्टो विप्रः)

कर्णः (अर्घ्यादिकमादाय प्रत्युद्गच्छन्)

सुस्वागतं द्विजवरेण्य ममैव भाग्या-
दभ्यागतोऽसि जनमेनमनुग्रहीतुम् ।
आज्ञापयाद्य तव किं नु करोमि तुष्ट्यै,
कर्णाहितार्थिवचनाभरणोऽस्मि कर्णः ॥

विप्रः वत्स ! अलमातिथ्यकृतप्रयासेन। वदान्यता पराक्रमसंशोभितं तव चरितमेव मम शाश्वतगौरवावहं पूजनम्। वत्स ! दानवीरोऽपि चिरं जीव।

कर्णः (आत्मगतम्) असाधारणः खल्वस्यालापः। को नु स्यात् ? अथवा तमेव पृच्छामि। (प्रकाशम्) भो भूसरोत्तम ! वीराणां चिरंजीवित्वं यशःकायेनैवाभिमततरम्। तथापि भवदाशिषं सादरं स्वीकरोमि। वत्सेति सस्नेहमामन्त्रयन्तं भवन्तं सम्यक् परिचिनोतु त्वरते मे हृदयम्। किं कारणमिति चेत् :

गान्धारीधृतराष्ट्राभ्यां राधाया रथिकादृते ।
नान्यैराहूतपूर्वोऽहं वत्सेति भवता यथा ॥

विप्रः तेभ्योऽप्यधिका खलु त्वयि मदीया स्वकीयता। श्रूयताम् :

एह्यत्रार्भक मेऽन्तिकं त्वमिति यो नैवाह्वयच्छैशवे
नाचुम्बद्दरहासदृश्यरदनं यस्ते प्रसन्न मुखम्।

प्रेमाविष्करणे शिशावपि निजे यो ह्यस्वतन्त्रोऽभवत्
सोऽयं तातपदस्य चाविलयिता त्वज्जन्मभूर्भास्करः ॥

कर्णः (सविस्मयम्) कथं विकर्तनो मे जनकः ?

यत्तेजसा भुवनमुन्मिषति स्वकृत्ये
यद्वंशजा रघुभगीरथरामभद्राः ।
यस्सर्वसाक्ष्यखिलभूसुरसेविताङ्घ्र-
स्तस्यात्मजं ह्यविदितान्वय इत्यनिन्दन् ॥

सूर्यः आम् । अरुन्तुदैर्वचनैर्मध्यमपाण्डवेन कुजातमिवाधिक्षिप्यमाणं लज्जावनतमुखं त्वां 'ममायं पुत्र' इत्युद्घोषणेन पर्यवस्थापयितुमप्यस्वतन्त्रः विदूरे वियति साक्ष्यं वहन् चण्डभानुरपि क्षीणपक्षक्षपाकर इवासम् ।

कर्णः नियतचारी भवान् परतन्त्रो ऽभवदित्यास्ताम् । तत्र कारणं पश्चाच्छ्रोष्यामि । का सा मे जननी यया "कुपुत्रो जायेत क्वचिदपि कुमाता न भवति" इत्यभिजनोक्तेरपवाद इवाचरितो मामुपेक्षमाणया ?

सूर्यः शृणु वत्स !

या कुन्तिभोजस्य नृपस्य पुत्री
पितृष्वसा या बलकृष्णयोश्च ।
या धर्मभीमार्जुनजन्मदात्री
सैवास्ति कुन्ती जननी तवाऽपि ॥

कर्णः (साश्चर्यम्) कथं कुन्ती ? आजन्मशत्रू कर्णकिरीटिनौ किं समानोदरादुत्पन्नौ ? न मे मनः विश्वासमावहति नष्टभर्तापि या पञ्चपुत्रान् विषमेष्वपि पर्यपालयत् सा कथमल्पभाग्ये मयि केवलं पिकचर्यामाचचार ?

सूर्यः असाधारणः खलु तस्याः पुत्रावाप्तिक्रमः ।

दुर्वाससं सुलभकोपनमातिथेयै -
र्बाला पृथा समभिसेव्य यमाप मन्त्रम् ।
तस्य प्रभाववशगास्त्रिदशाः क्रमेण,
प्रादुस्सुतान् निजसमानबलान् हि तस्यै ॥

कर्णः नैते पाण्डुपुत्राः किम् ? तर्हि मम को भेदः ?

सूर्यः मन्त्रस्यास्य प्रभावं परीक्षितुकामा सा विस्मृतकन्याभावा मामनुस्मृत्य तं मन्त्रं प्रायुङ्क्त । त्वदुत्पत्तिसमकालमेव लोकापवादभीरुस्तपनीयनिभदेहच्छविं कमनीयविग्रहं त्वां पेटिकायां निक्षिप्य रन्तिदेवकीर्त्यां स्रोतोमूर्त्यां चर्मण्वत्यां विससर्ज ।

चर्मण्वती च यमुना च सुरापगा त्वा -
मूहुः स्वफेनकटकाञ्चितवीचिहस्तैः ।।
सोमान्वयैकसहजात् भुवनाधिपत्या
त्सूताङ्कमश्वखुरघृष्टकिणाङ्कयुक्तम् ।।

कर्णः (सप्रतिषेधम्) मैवं भणतु भवान् । पावनीभिराभिरद्भिः प्रक्षालितपाण्डवाग्रजन्मकलङ्कः, राधासूतयोरकैतवप्रेमालिङ्गनप्रसृतकरतरङ्गमण्डितं निष्कारणोपात्तसुयोधनकुन्तवात्सल्यदुग्धाम्बुधिं खलु प्रापितोऽहम् ।

सूर्यः (आत्मगतम्) बलवत्खल्वस्य दुर्योधनपक्षपातित्वम् । दुर्निवार्योऽयं पाण्डवविरोधात् । अतः कौरवपक्षस्थस्यैवास्य यथा आपदो न भवेयुस्तथा विधातव्यम्, नान्या गतिः ।

कर्णः किमर्थं चिन्ताक्रान्त इव दृश्यते भवान् ?

सूर्यः तामेव पूर्वकथामनुस्मरामि ।

कर्णः अस्ति वा कथावशेषः ? कथयतु भवान् ?

सूर्यः एवं जातमात्रमेव आप्तजनरहितं अननुमेयानां विधिविपर्ययाणां पात्रतां नीतं त्वां सर्वदाऽभिरक्षितुमभेद्यं तनुच्छदं कुण्डलयुगलं च च संभाविते मया । एतदेव पित्रा मया त्वत्कृते कृतम् ।

कर्णः न केवलं तत्

पित्र्यमंशमधिकं ततोऽपि म-
य्यस्ति सत्यपरता पराक्रमः ।
आश्रितेषु पुनरानृशंस्यता
मित्रता च भवतस्समार्जिता ।

सूर्यः गुणैरेतैः पुत्रादिच्छेत्पराजयमिति न्यायेन मामतिशेषे त्वम् । तथापि त्वामुद्दिश्य चिन्ताव्याकुलं मे मनः । अत एवात्रागतोऽस्मि ।

कर्णः कथं मामुद्दिश्य व्याकुलः ? उच्यतां को ममापराधः प्रतिकर्तव्य इति । पुत्रकृतोऽपचारः खलु पितृहृदयशल्यम् ।

सूर्यः न खलु, न खलु,

वेलामुल्लङ्घयेदब्धिः सत्यं धर्मात्मजस्त्यजेत् ।
अकृत्यं नैव कुर्यास्त्वमपि जीवितहेतवे ॥

अत एव ममोत्कण्ठा ।

कर्णः अकृत्यस्याकरणमुत्कण्ठाकारणमिति नूतनोऽयं कार्यकारणभावः । विशदं ब्रवीतु भवान् ।

सूर्यः वत्स ! श्रूयताम् । सहजसिद्धाभ्यां कवचकुण्डलाभ्यामागामिनि सांपराये दुरुच्छेद्यं त्वामाकलय्य तव दानशौण्डीरतां सम्यग् जानन् मघवा निजात्मजस्य धनञ्जयस्य विजयमाशंसमानः त्वां विप्रलब्धुमचिरादागमिष्यति । तस्मिन्नवसरे जागरूकेण भवितव्यं त्वया ।

कर्णः कथं देवराजोऽपि प्राकृतवल्लोभवशंगतः प्रतारणव्यसनी भवेत् ?

सूर्यः अथ किम् ? याञ्चाच्छलेन तव कवचकुण्डले अपहर्तुमागमिष्यति । तदानीं स्वां स्वाभाविकीं दानशीलतां न प्रकटयेः ।

कर्णः अहा ! लघूकृतं भवति त्रिदशाधिपत्वं पाकशासनेन । लघुतरीकृतं पुनर्ग्रहाधिपत्वमित्थंवादिना भवता ।

सूर्यः पुत्रस्य योगक्षेमविषये सहजा खलु पितुरुत्कण्ठा ।

कर्णः यदि भवद्वचनानुरोधेन कथञ्चित् दानव्रतादात्मानं निवर्तये तदाऽपि मत्प्राणपरिरक्षणे भवतः श्रमो वृथैव स्यात् ।

सूर्यः कथं वृथा स्यात् ? अमोघे खलु कवचकुण्डले तव रक्षणकृत्ये ।

कर्णः श्रूयताम् :

देहीति वाक्यश्रवणादनन्तरं
ह्यनर्थिसात्कृत्य तदर्थिवाञ्छितम् ।

कर्णो न धार्येत यतः स्वजीवितं
तद्रक्षणे स्याद्विफलश्रमो भवान् ।।

सूर्यः दानवीरोचितं ते भाषितम् । किन्तु एतयोर्दानेन विपत्तिस्ते ध्रुवा । अदाने व्रतभङ्गजनितपश्चात्तापपरिपाकमयी या विपदाशङ्क्यते सा कदाचित् गुरुवाक्यानुसरणजन्यपुण्येन परिहार्या भविष्यति ।

कर्णः जीवन्मृतत्वं ह्युत कीर्तिरालयाद्
भवत्सुतस्यानुगुणं भवेदिति ।
त्रिलोकसाक्षी ऋतसत्यरूपी
विचिन्त्य निष्पक्षमुदीरयेद् भवान् ।।

सूर्यः वत्स ! कीर्तिर्नाम भाग्यहीनस्य नरस्य चिताग्निलग्ना धूमपटली, पराजितस्य पुरुषकारस्य मुखावगुण्ठनम् अविचार्यकारिताया मिथ्याभिमानडिण्डिमः । जीवन्हि नरो भद्राणि पश्यति । तस्मादनुचितोऽयं ते निर्बन्धः ।

कर्णः मैवं भणतु भवान् । कीर्तिर्हि मर्त्यस्यामर्त्यत्वसम्पादिनी सुधा, दैवपुरुषकारयोः परस्परसंघर्षे पौरुषस्य इहपरलोकयोर्विजयवैजयन्ती, अनिवार्यशासनेनाप्यन्तकेनापहर्तुमक्षमा नियतसहचरी धीरस्य ।

सूर्यः परप्रतारणपराजितस्य विचारशून्यताऽपि किं कीर्तिपदवाच्या ? कुटिलचित्तैर्वञ्चितं निज पुत्रं नैतादृशकीर्त्तिभाजं द्रष्टुमुत्सहे ।

कर्णः (विहस्य) कोऽत्र वञ्चितो भविष्यति ? दाता वा प्रतिगृहीता वा ?
वज्राधानविचक्षणं करतलं कार्पण्यमुद्रायितं
धृत्वा मत्पुर एत्य तिष्ठति सति स्वायत्तकल्पद्रुमे ।
यज्ञाराध्यतनुः स्वयं शतमखः सूतात्मजापेक्षया
नूनं वञ्चित एव नष्टमहिमा लब्धेप्सितार्थोऽपि सन् ।।

सूर्यः भो यशोधन ! पात्रेषु दत्तं खलु दानम् ।

कर्णः कश्यपप्रजापतेरात्मजात् त्रिविक्रमचङ्क्रमितत्रिभुवनस्य भगवतो नारायणस्याग्रजात् यज्ञभागभुजः पाकशासनादस्ति वा प्रशस्ततरः

पात्रविशेषः ?

(नेपथ्ये वैतालिकः)

चरमयाममुपेत्य विभावरी
स्वकृतमन्धतमिस्रमपोहितुम् ।
कमपि मार्गमलब्धवती चिरा-
द्विरमतीव दिनाय विसृज्य तम् ॥

सूर्यः (कर्णं दत्वा) उदयकालो मेऽतिवर्तते । न मया क्षणमप्यत्र स्थातुं शक्यते । पुत्रवात्सल्ये यद्यत्कर्तव्यं तन्मया कृतम् । अतः परं :

यो रक्षिते रक्षति रक्षितारं
यस्मिन् क्षते सर्वमरक्षितं स्यात् ।
यद्रक्षिते रक्षितमेव सर्वं
धर्मोऽक्षयस्त्वां समरेऽभिरक्षतु ॥

(निष्क्रान्तः)

ध्वस्तं कुसुमम्

(शोकगीतिः)

दाक्षिणात्यः कश्चिदुद्बुद्धयौवनः कामी कश्मीरदेशीयां कामपि समानरूपशीलां कन्यां वोढुं कृताभिलाषः तस्याः प्रणयप्रार्थनाः स्वीकुर्वन्नपि स्वमातापित्रोरनुमोदनं प्रतीक्षमाण आसीत् । स चाकाण्डे शकटविपत्त्यां मृतिमवाप । कतिपयदिनान्तरं कामला(जार्ण्डिस)-बाधितः कविरयं यदा चिकित्सालये आसीत्तदानीं लिखितोऽयं विलापः ।

(१)

स्तबके मुकुलान्तरैस्समृद्धे
सुममेकं तु विकासमाप पूर्वम् ।
बहुचित्रितकोमलैर्दलैर्य-
ज्जगतां दृष्टिमलोभयत्समेषाम् ॥

(२)

दरदृश्यरजःकणाभिरामै-
र्नवकैः केसरपङ्क्तिभिश्च मध्ये ।
विलसद्भिरनङ्गबाणभूतै-
रबला मानसमाजघान तीव्रम् ॥

(३)

अवधिर्मकन्दसौरभाणां
धुरि गण्यं मधुमाधुरीप्रसङ्गे ।
निकषं द्रुहिणस्य शेमुषेर्य-
न्नयनाकर्षणसर्गबद्धदृष्टेः ॥

(४)

अनिवारितदुर्विधिः कदाचि-
त्तदिदं पुष्पमकाण्ड उज्जहार ।
तिलकं भुवनस्य भालदेशा-
द्बत हा ! कष्टमपामृजत्करास्याम् ॥

(५)

विललाप समस्तमेव विश्वं
ह्युपलोऽपि द्रवतामवाप दुःखात् ।
पितृलोकपतिं निनिन्दिरेऽन्येऽ
प्यशपन्नीश्वरमन्ध इत्यथान्ये ॥

(६)

अहमप्यशनिप्रपातमेतं
न विषेहे यदभूद्विनापि हेतुम् ।
विधिमेव निरङ्कुशं स्वतन्त्रं
विजगर्हं गुणदोषभेदमूढम् ॥

(७)

किमु पञ्चसुमायुधस्य षष्ठो-
ऽप्युपहारो विधिना स्वयं प्रदत्तः ।
मदनस्य तपःफलं किमेत-
द्यदकुण्ठं निटिलेक्षणेऽपि भूयात् ॥

(८)

न हि तेन कृतापराधलेश-
स्सकलाह्लादनबद्धचित्तवृत्त्या ।
यदि तच्च विधे ! न मर्षणीयं
वद ते निष्कृप ! किञ्चिदस्त्यशक्यम् ?॥

(९)

सुरभिं पवनाहृतं तदीयं
समुपाघ्राय विदूरतः समेताः ।
भ्रमराश्च तदीयजन्मभूमौ
तमदृष्ट्वा प्रतियान्ति खण्डिताशाः ॥

(१०)

प्रथमं तमुपागता च काचि-
द्गुणलुब्धा भ्रमरी समीपकुञ्जात् ।
तमजिघ्रदमुह्यदस्य रूपे-
ऽप्यमुदत्तस्य गुणानगुंजदुच्चैः ॥

(११)

परितस्तं हि चचार जिघ्रमाणा
निजकाश्मीरमधुस्रवन्मुखेन ।
न चुचुम्ब परं तु दक्षिणाशा-
पवनस्यानुमतिं प्रतीक्षमाणा ॥

(१२)

भ्रमरी क्वणितच्छलेन याव-
न्निजभावं प्रकटीचकार तस्मै ।
पुटभित्तिमुपेत्य सैष शब्दः
प्रतिवाक्यं कुसुमेरितं बभूव ॥

(१३)

नटनोद्यतचारुपादषट्का
करतालाहतचित्रपक्षयुग्मा ।
मधुरस्वरगुञ्जिता नटीयं
नवधास्वाद्यरसाश्रया बभूव ॥

(१४)

प्रणयी स्वयमुन्मुखोऽपि धीरः
पवनस्यागममेव संप्रतीक्षन् ।
स्वगतं विनिगूह्य नाह्वयत्तां
सशिरःकम्पमनन्यमानसोऽपि ॥

(१५)

सकृदप्यनयोस्समागमेच्छा-
मसहिष्यंस्त्वमपाहरस्सुमं तत् ।
शठ ! निर्घृण ! मागमः प्रतिष्ठां
कुविधे ! सज्जनवृन्द्रनिन्द्य! धिक् त्वाम् ॥

(१६)

अथवा तव गर्हणाय कोऽहं
यदि वल्मीकभुवा कृतं ततः किम् ? ।
अहमल्पमतिस्तपोविहीनः
कविता न ह्यु दियान्मदीयशोकात् ॥

(१७)

इति हृद्गतभाववीचिमध्ये
गदवेगाद्गमितोऽहमर्धनिद्राम् ।
यतिमद्भुततेजसां निधानं
धृतकाषायमपश्यमग्रतो मे ॥

(१८)

मम संशयकामलाभिमृष्टे
वदने तस्य दयार्द्र दृष्टिपातः ।
न्यपतत् स च मां करे गृहीत्वा
जगदम्बानिलयं निनाय काञ्च्याम् ॥

(१९)

तत्राम्बायाश्चरणयुगले न्यस्तमालोकये त-
न्नित्योत्फुल्लं कुसुममभितः पुण्यगन्धप्रसिक्तम् ।
यस्मिन्मग्नाः प्रणतदिविषद्वृन्ददृष्टिप्रपाता
यावत्तोषं मधु मधुकराकारभाजः पिबन्ति ॥

नरबलिप्रबन्धः

(प्रबन्धः)

नेपाले कस्यांचित्पर्वतोपत्यकायां जीर्णं चण्डिकामन्दिरं दृष्ट्वा लिखितोऽयं पद्यगद्यात्मकः प्रबन्धः । केरलेषु चाक्यारनटानामुपयोगाय गद्यपद्यात्मक-लघुकाव्यानां प्रबन्धाभिधानां रचनासंप्रदाय आसीत् ।

तुहिनधवलशृङ्गे चन्द्रमौलिं दधानः
स्थविरवृषभतुल्यस्तुङ्गकीर्त्या सिताङ्गः ।
त्रिभुवनपरिशुद्ध्यै स्वर्धुनीजन्मदाता
विलसति धरणीघ्रो धर्ममूर्त्तिर्हिमाद्रिः ॥१॥

यः किल

भवकेशविसर्जितगाङ्गजलै-
र्भववामदृढकृपोर्मिचयै-
र्भवबन्धहरैर्बहुतीर्थवरै
र्भुवनं परिपावनमातनुते ॥२॥

यस्य च

श्रुतिसिन्धुमथ स्मृतिजह्नुसुतां
यमुनायितपुण्यपुराणततिम् ।
जगतो ददतः खलु नैकसुना-
जनकर्तनसङ्गतशोकवशम् ॥३॥

यो हि

कवितावनसञ्चरणैकचणैः
कविकेसरिभिः स्तुतभूरियशः ।
धरणीधरतामितराद्रिगता-
मवहेलयतीव हिमैर्धवलैः ॥४॥
चलदभ्रशिखागतनीरकणा-
नपनेतुमिव श्लथबन्धसटः ।
किमु दक्षिणवातसिसेविषया
धनदाध्युषितामधितिष्ठति गाम् ॥५॥

इत्थमुत्तुङ्गशृङ्गसब्रह्मचारिणा यशोराशिना समुद्योतमानस्य महीमानदण्डायितस्य तुहिनाचलस्य नितम्बैकदेशेऽस्ति पुराणं जीर्णमायतनमम्बिकायाः । यस्य जनसञ्चारशून्यतया इयमवस्था -

श्लथभित्तिषु रूढवनस्पतिभिः
परिजीर्णकवाटपुटैश्शिथिलैः
बलिपीठतलाहितनाकुबिलैः
निबिडं पतितैस्तरुपत्रचयैः
श्चिरविस्मृतपायसपाककथैः
विरलेन्धनपाकगृहैश्शिशिरैः
श्चिरसिक्तघृतोज्झितदीपशतैः
रशिखैर्हरितैरपि कांस्यमयैः
रनुमेयमिदं यदिहायतने
जनसञ्चरणं नु चिरात्ममभूत् ॥६–८॥

अद्याप्यत्र

तिमिरावृतगर्भगृहेऽस्ति शिला
महिषासुरमर्दनमूर्त्तिमयी ।
करवालनिकृत्तसुरारिशिर-
स्ततिनिर्मितहारविभूषिगला ॥९॥

वरशूलविदीर्णमहामहिष -
स्फुटदङ्गविनिर्गतमर्द्धनरम् ।
सकचग्रहमीक्षितुमात्तरसा
दरभुग्नगला शितिकण्ठवधूः ॥१०॥
कटुरोषदवाग्निवमन्नयना
मुखकन्दरनिःसृतदंष्ट्रयुगा ।
प्रकटीकृतषोडशबाहुलस-
द्वरदाभयशंखशरासिधनुः ॥११॥
रसनाञ्चलतूलिकया रुधिर-
द्रवरञ्जितया गगनाभ्रपटे ।
लिखतीव जगच्चरमानुकृतिं
प्रलयाग्निहुतद्रुहिणाण्डशतम् ॥१२॥

यस्याश्च महिषमर्द्दिन्याः

अभिषेकविधिर्मुकुटाग्रलस-
न्मधुकोशगलद्रससिक्ततनो-
र्न चिराय नरेण सुवर्णघटै-
स्समनुष्ठित आहृतगाङ्गजलैः ॥१३॥
उरगच्छदवेष्टितविग्रहम-
प्यपरीतदुकूलमनाभरणम् ।
उपरिस्थशिलीन्ध्रशतैर्गमितं
नवरत्नमयाभरणद्युतिमत् ॥१४॥
परितः प्लुतचर्मचटीरचितं
व्यजनं न मनुष्यकरैश्चलितम् ।
ददग्धवनोल्मुकधूममिषा -
त्कृतधूपमधूपितगुग्गुलुकम् ॥१५॥

स्वबलार्जितवन्यफलानि परा-
नपवार्य सुरक्षितुमात्तजवाः ।
गिरिजालयमध्यगता हरयो
रचयन्ति हि यत्र निवेद्यविधिम् ॥१६॥

अनिलाहृतपत्रसुमैरनिशं
हिमसिक्तपुटैस्सह मर्मरितैः
रभिधानसहस्रजपानुगतं
ललिताचरणार्चनमाचरितम् ॥१७॥

दीपामास शशी प्रदोषसमये कुम्भीन्द्रमन्द्रस्वनो
वाद्यामास, फणीन्द्रमौलिमणिभिर्नीराजनं कल्पितम् ।
शंखध्वानमिवाचरत्यटविराट् स्वैर्गर्जितैस्सर्वम-
प्यम्बापूजनमत्र निर्जनवने सम्पन्नमव्याहतम् ॥१८॥

पुरा किल जैवमाभुवनमभिव्याप्ते कलिदोषकज्जले केनचित्तापसेन स्वतपोभिराराधिता जगज्जनिस्थितिलयहेतुभूता भवानी तत्पुरतः प्रत्यक्षीभूय तदभीष्टं पप्रच्छ । स्वार्थपराङ्मुखेन तेन सत्त्वैकतानमतिना विश्वकल्याणाय कमप्युपायमीषच्छेमुषीविषयमभिलषता जगदम्बाप्रसादनिदानभूता शिलामयी महिषमर्दिनीमूर्तिरासादिता । तामपि वेदमन्त्रपुरस्सरमागमोक्तविधानेन पावने तुहिनगिरितटे प्रतिष्ठाय प्रतिदिनमुपांसाचक्रे । तेन समेधितचैतन्या सा भूतधात्री स्वापाङ्गतरङ्गैः सर्वाबाधाप्रशमनाख्यं प्रख्यातं निजं कार्यं कुर्वन्ती विरराज । वरिवस्याविशेषैर्मन्त्रप्रभावैरुपासनाबलेन च प्रतिदिनं तत्र चैतन्यविस्फूर्जितमेधमानमभूत् । देवतायाः निग्रहानुग्रहप्रभावः दूरवासिनामपि जनानां श्रवणविषयतामेत्य प्रतिदिनं तत्र सन्दर्शनार्थमागच्छतामाराधकानां संख्यामुपावृंहयत् । तेषु केचिन्निजाभीष्टप्राप्तिजनितकार्तज्ञनिवेदनाय तस्यै दुकूलपट्टादीनि वसनविशेषाणि कटककेयूराद्याभूषणानि रजताताम्रमयानि वाहनान्दोलिकानि चोपायनीचक्रुः । अपरे च गोपुरप्रासादध्वजस्तम्भादीनि निर्मायायामासुरितरे मन्दिरभित्तिषु विचित्राणि चित्राण्यालेखयामासुरन्ये च

छत्रचामरमणिपीठादीन्युपाजह्रुः ।

गतेषु कतिपयेष्वब्देषु तपस्साधनाभिरीश्वरानुग्रहेण चोच्छिन्नानाद्यविद्याग्रन्थिस्स तापसः स्वयोगप्रभावेण सूक्ष्मं शरीरं पञ्चभूतेषु विलाप्य जीर्णं त्वचमुरग इव समुज्झितस्थूलकलेकरः परदेवताचरणकमलद्वन्द्वसायुज्यमवाप ।

तस्मिन्नेव वत्सरे नवरात्रोत्सवमाघुष्य प्रतिप्रयाणोन्मुखेषु जानपदेषु भक्तेषु संवर्धमानविभवस्य मन्दिरस्य साम्पत्तिकीं व्यवस्थामाराधनाक्रमस्याविच्छिन्नतां च निर्वोढुं कं वा नियोक्ष्याम इति विचारस्समजनि ।

तदानीं तेषां मध्यान्मध्यवयस्कः कश्चिज्जटामण्डलवलयितमुत्तमाङ्गं, रक्तचन्दनानुलिप्तं निटिलप्रदेशं, नैकरुद्राक्षमालालंकृतमुरस्तटमीषज्जरितमाकुक्षिलम्बमानं श्मश्रु च बिभ्राणः, गिरिकन्दरप्रतिध्वनितघोराट्टहासः, आपादचूडमावेपमानगात्रः, करगतैः प्रकरैरकंतितैर्नखरैर्विलुञ्छितजटासटः, मुखकोटरोद्गतफूत्कारपरम्पराभिर्वात्यागमभ्रान्तिमुत्पादयन् किरदग्निशिखाभ्यामसकृदुद्वर्तिताभ्यां नेत्रगोलकाभ्यामकालतडिदुज्जृम्भितभ्रान्तिमारचयन्, शश्वत्सव्येतरपादसङ्घट्टनेन भूकम्पशङ्कां जनयन्, "भो ममार्भकाः ! युष्मन्मनोगतमवगच्छन्त्या भगवत्या निजालयपर्यवेक्षणाय संप्रेषितं भद्रंकरं वीरभद्रावतारं दुर्गाभटं मामवगच्छत" इत्युच्चतरमुच्चरन्नुज्जजृम्भे ।

निर्व्याजभक्तिभावितान्तरङ्गास्सम्मिलितास्सर्वे अम्बिकाप्रेषितोऽयमिति विश्वासभावनाभासुरितचेतसा मानयन्तस्तच्चरणयोर्दण्डवन्निपत्य मन्दिरनिर्वाहधुरमखिलं निजान्तरङ्गश्रद्धाबहुमानादरैस्सह दुर्गाभटकरे न्यासीचक्रुः ।

इत्थमुत्पादितविश्वासः क्रमेण निजाज्ञामनुल्लङ्घनीयां विधाय स दुर्गाभटः, अज्ञातभक्तिरसोऽप्यनधीतवेदागमोऽप्यपरिचितमन्त्रप्रभावोऽप्यनवगतोपासनाक्रमोऽपि बाह्याडम्बरचमत्कारैराराधकान् प्रतारयन्, जिह्मच्छलवञ्चनाभीषणशापोच्चारणफट्कारहुंकाराद्यैः प्रकारशतैः पामरजनेषु कामपि भीतिमुत्पादयन् मन्दिरनिर्वाहमतिवाहयामास । गदातुराणां व्याधिबाधानिवृत्तिमाधिग्रस्तानामीहितसुखप्राप्तिमनूढानां युवतीनां शीघ्रविवाहमङ्गलमनपत्यानां पुत्रोत्सवप्रापणं, भूतप्रेतपिशाचबाधापराभिचारोन्मादप्रभृतीनां प्रशमनं, मित्राणां

भेदनमित्राणां मित्रीकरणमुच्छृङ्खलानां वशीकरणमेवमादिषु स्वनैपुण्यमुद्घोषयन् सन्दर्शकानां देवतोद्दिष्टां त्रिकरणायत्तां श्रद्धां क्रमेण निजाभिमुखीनां कृत्वा, कलत्रपुत्रपरिवारैस्सह स्वविभवं विस्तारयन् सुखमुवास।

जाल्मेन तेन निर्वर्तिते अविधिपूर्वके वरिवस्याक्रमे अश्रुतिगोचरत्वाच्छ्रुतिवचनानाममन्त्रितत्वान्मन्त्रवर्णानां दुरागमत्वादागमविधीनामपुण्यावहत्वात्पुण्याहवाचनानामप्रतिष्ठितत्वाहत्प्रतिष्ठाविधीनामनाचरितत्वादाचाराणामपठितत्वात्स्तोत्रपाठानामवाचितत्वात्स्वस्तिवाचनानां दिने दिने देवताविग्रहस्य चैतन्यं परिक्षीयमाणमभूत्। क्रमशः दुर्गाभटस्यामानुषप्रभावेष्वपि वाञ्छितफलावाप्त्या वञ्चितानां जनानां विश्वासेन साकं क्षेत्रसन्दर्शकानां संख्याऽपि ह्रासोन्मुखी बभूव।

सन्दर्शकानां वैरल्यादायद्वारेषु प्रायशः पिहितेषु स दुर्गाभटः संवर्धमानं कुटुम्बभरं निर्वोढुं मार्गान्तरमपश्यन् भगवत्यै भक्तजनैरुपायनीकृतानि स्वर्णभूषणानि रजतपात्रादीनि च निकटवर्त्तिनि नगरे विक्रेतुमुपचक्रमे।

तस्य प्राक्तनपुण्यावसर्ति यावत्तत्कृतदुर्भोगचर्यां तितिक्षमाणा कालचक्रप्रवर्तनैकचतुरा चण्डिका कस्मिंश्चिद्दिने झटित्येव निजापाङ्गभ्रूभङ्गसब्रह्मचारिणा स्वविभूत्यैकदेशविलासभूतेनाशनिप्रपातेन दुर्गाभटं तमवसितदर्शनव्यापारमन्तर्मनसीव बहिरपि गाढान्धकारपरिवृतमकरोत्। इत्थमवसितदृष्टिवृत्तेस्तस्माद्वृत्तिलाभेऽपि विगलितप्रत्याशाः कलत्रपुत्रादयो यत्किञ्चिदवशिष्टं मन्दिरस्थं द्रव्यजातमादाय 'दुर्नेयोऽयमन्ध' इति तत्रैव तं विहाय वृत्तिलाभाय देशान्तरमभिप्रतस्थिरे।

निश्चेष्टाभ्यां नेत्रकोटराभ्यामुष्णाश्रुधारा मुञ्चन् बहुधा याचमानोऽपि दुर्गाभटः परिवारैर्निष्करुणं परित्यक्त इक्षुखण्ड इव चर्वितोज्झितः शोकेन द्विगुणितामन्धतामावहन् किंकर्त्तव्यतामूढ इतस्ततः परिभ्रमन् स्खलद्गतिश्चण्डिकालयद्वार्यवाक्शिराः पतन् कृच्छ्रेण पुनरुत्थित उच्चैररण्यरुदितमकरोत्।

अस्वजनीभूतेषु स्वजनेषु विदूरं गतेषु बुभुक्षापिपासाभ्यां पीडितो मन्दिराभ्यन्तरे परिभ्रमन् क्वचिद्वृक्षसंघट्टनोत्पाटितललाटभित्तिः, क्वचिद्गर्त्तपातजर्ज्जर

रितसन्धिबन्धः, कचित्कवाटपुटकीलोत्पाटितनासापुटः, क्वचित्कण्टकशताविद्धकलेवरः, क्वचिद्दन्दशूकसन्दष्टः, कस्मिँश्चित्कर्दमाटके पुरा कदाऽपि मज्जितं कृमिकीटसंकुलमभिषेकजलसेकमासाद्य तद्गतमुदकं करपुटैरादायापिबत् ।

अविचार्याप्यम्बिकासम्पर्कपावितमभिषेकजलमापिबतस्तस्य मोहान्धकारगुम्फितेऽन्तरङ्गे झटित्येव निबिडतरजलधरपटलाभ्यन्तरोज्जृम्भितडिल्लतेवोद्भूता प्रतिस्मृतिप्रसूता पश्चात्तापमयी काचित्सुवर्णरेखा पुरतः प्रादुर्बभूव । तस्याश्च विद्युल्लेखायाः प्रभाजालेन प्राकृतदुरितपरम्परानिवहस्य प्रतिकृतिश्चित्तचित्रपटे दृश्यतामगात् । अनुक्षणमभिवर्धमानप्रमाणा सा हाटकरेखा कालाकारकरालसर्पमुखकोटरकोटिविनिर्गमज्जिह्वाशतैरिव प्रज्ज्वलच्छिखाच्छविभिश्शवलिता निखिलजगद्दिधक्षोः कल्पान्तदहनस्य सादृश्यमाबिभ्राणा तत्पुरतो जजृम्भे ।

जाग्रत्स्वप्नयोरन्तरा कामप्यनिर्वर्णनीयामवस्थां प्राप्तस्य दुर्गाभटः भावनाचक्षुषा तस्य ज्वलदग्निमण्डलस्य सन्निध्यमनुभवन्, सन्त्रासजनितज्वरवेगकम्पितगात्रेण, शोकबाष्पोपरुद्धकण्ठनालेन, भयज्वालावलीढरुधिरद्रवसमुच्छोषितधमनिसन्ततिना, प्रचण्डझंझावातप्रहतकीचकसमामवस्थां गतः, स्थगितसर्वेन्द्रियव्यापारोऽपि विनष्टं दर्शनेन्द्रियं पुनरुपात्तमिवानुभवन् भूयो भूयस्तदेव वह्निमण्डलमीक्षांचक्रे ।

तदनु तस्मिन् कृशानुप्रभायिताम्बरपरिवेषाभ्यन्तरे रौद्राट्टहासस्तनितनिर्घोषबधिरीकृतदिगन्तमुद्धूतकुणपावसिक्तकरवालधारातडिद्विलसितमञ्जनगिरिसदृशनिबिडतरनीलिमानमाबिभ्राणमारक्तनेत्रत्रयप्रहितदृष्टिपातव्याजेन करकावृष्टिमभिवर्षन्तं, विश्लथद्घनकेशपाशविरचितदुर्दिनावस्थं, निकृत्तारातिगात्रोद्धृतमांसवसावलिप्तत्रिशूलरूपत्रिदशाधिपचापमण्डितं, विपाटितमत्तकुम्भीन्द्रकुम्भोद्गतरुधिरावसिक्तमहामृगेन्द्रमयमलयमहीधराधिष्ठितं पुरन्ध्र्याकारं कमपि कल्पान्तकालमेघं ददर्श ।

ईदृक्तया तामामन्त्रयितुं स्तोतुं वाऽप्यशक्तस्स दुर्गाभटो दुरितोष्मणा मनसि पुरोवर्त्तिन्याश्चण्डपराक्रमातपेन बहिश्च दन्दह्यमानः सगद्गदाक्षरमित्थं विललाप :

लिप्तस्त्वत्करवाल एष न चिरायारातिगात्रासवै-
दिग्धो मद्रुधिरैर्जपासुमरुचिं भूयो व्रजत्वम्बिके !
दग्धोऽयं ममताविषेण शिशिलो दुर्मांसभाण्डायितो
देहस्त्वन्नररक्तदोहदविधिं निर्वाहयेत्स्वीकुरु ॥१९॥
व्यामोहो महिषासुरो मदवपुर्ध्वाक्षरात्रिंचरो-
ऽप्यत्याशो खलु रक्तबीजदनुजस्तृष्णायितो वर्तते ।
शुम्भो रागवपुस्तदीयसहजः क्रोधाकृतिर्लक्ष्यते
मय्यत्रैवमरातिचक्रमखिलं जागर्ति मातर्जहि ॥२०॥
पाणिस्पर्शहताखिलाघनिचयः पापोऽयमुच्चैर्गतिं
गच्छेद्दुष्कृतिजं विपाकमखिलं नासादयेदित्यपि ।
शङ्का चेद्धनने मदङ्गमखिलं छिन्द्यम्ब ! तच्छोणितै-
स्तृप्ता, सासुमिमं त्यजाऽत्र सुचिरं भोक्तुं निजानंहसः॥
यावन्मामकगात्रमेतदधुना त्वत्पादपङ्केरुहे
स्वीयं शोणितपाद्यमर्पितुमलं तावत्पवित्रीकुरु ।
यावन्मांसबलिं विधातुमुचितः स्याद्देहभारोऽप्ययं
तावत्त्वत्करुणारसैर्वितनुतात् पुण्याहसंप्रोक्षणम् ॥२२॥
नाकांक्षे न च योग्यताऽस्ति मम नाप्यर्होऽस्मि मोक्षप्रदं
स्वीकर्तुं तव सुन्दराननशशिज्योत्स्नायिताऽनुग्रहम् ।
किन्त्वस्त्याग्रह एष मामकमनस्यम्बाद्य संश्रावये
यत्त्वत्क्रोधसहस्रदीधितिकरैरेनं समुच्छोषय ॥२३॥
दुर्गे दुर्गतिमाश्रितोऽयमधमस्त्वत्पादपङ्केरुहं
प्राप्याप्युद्धतगर्वलोभवशगो धूर्त्तः कृतघ्नाग्रणीः ।
पश्चात्तापहुताशदग्धदुरितं त्वद्दृष्टिपातामृतै-
स्सिञ्चैनं जगदम्ब! हाटकरुचिं यायादयं पूर्ववत् ॥२४॥

शुद्धिः १० पृष्ठेऽन्तिमः श्लोक इत्थं पठनीयः :
पित्र्यमंशमधिकं ततोऽपि मे विद्धि सत्यपरतां पराक्रमम् ।
आश्रितेषु पुनरानृशंस्यतां मित्रतां च भवतः समार्जिताम् ॥

शुद्धिपत्रम्

पृष्ठे	पङ्क्त्याम्	अशुद्धरूपम्	शुद्धरूपम्
३	७	२४	२६
८	१३	कर्णाहितार्थि···	कर्णाहितार्थि···
९	७	ह्लविदितान्वय	ह्यविदितान्वय
९	२०	···मावहति	···मावहति ।
१०	५	स्रोतोमूर्त्यां	स्रोतोमूर्त्या
१०	२१	कुण्डलयुगलं च	कुण्डलयुगलं
१३	९	रक्षिते	रक्षितो
२०	२१	चिरात्मममभूत्	चिरात्समभूत्
२२	१३	जैव·····	नैव·····
२३	४	···कलेकरः	···कलेवरः
२४	६	···प्रतिष्ठितत्वाहत्प्र···	···प्रतिष्ठितत्वात्प्र··
२५	७	···प्राकृत	···प्राक्कृत
२५	१२	सन्निध्य···	सान्निध्य···
२५	२२	पुरन्ध्र्याकारं	पुरान्तकपुरन्ध्र्याकारं
२६	३	शिशिलो	शिथिलो

—:०:—

देववाणी-परिषदा प्रकाशिताः

संग्रहणीया ग्रन्थाः

१. सुगमरामायणम् (महाकाव्यम्)

प्रणेता ☐ श्रीरमेशचन्द्रशुक्लः, आकारः ☐ डिमाई,
मूल्यम् ☐ पञ्चत्रिंशद् रूप्यकाणि, **Rs. 35.00**

२. श्रीकृष्णचरितम् (महाकाव्यम्)

प्रणेता ☐ श्रीरमेशचन्द्रशुक्लः, आकारः ☐ डिमाई,
मूल्यम् ☐ त्रिंशद् रूप्यकाणि, **Rs. 30.00**

३. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (प्रथमखण्डः)

सम्पादकः ☐ डॉ० रमाकान्तशुक्लः, आकारः ☐ रॉयल आक्टेव,
मूल्यम् ☐ पञ्चदश रूप्यकाणि, **Rs. 15.00**

४. अर्वाचीनसंस्कृतमहाकाव्यविमर्शः (द्वितीयखण्डः)

सम्पादकः ☐ डॉ० रमाकान्तशुक्लः, आकारः ☐ रॉयल आक्टेव,
मूल्यम् ☐ त्रिंशद् रूप्यकाणि , **Rs. 30.00**

५. देववाणी–दर्शनम् (प्रथमखण्डः)

सम्पादकाः ☐ डॉ० रमेशचन्द्रशुक्लः, डॉ० रामसुरेश पाण्डेयः,
डा० रमाकान्तशुक्लः, आकारः ☐ रॉयल आक्टेव,
मूल्यम् ☐ पञ्चाशद् रूप्यकाणि, **Rs. 50.00**

६. अर्वाचीनसंस्कृतकविता

सम्पादकः ☐ डॉ० रमाकान्तशुक्लः, आकारः ☐ रॉयल आक्टेव,
मूल्यम् ☐ दश रूप्यकाणि **Rs. 10.00**

७. कर्णभूषणम् (एकाङ्किनाटक-शोकगीति-प्रबन्धकात्मकरचनात्रयम्)

रचयिता ☐ डॉ० सी० आर० स्वामिनाथन्, आकारः ☐ डिमाई
मूल्यम् ☐ पञ्चदश रूप्यकाणि, **Rs. 15.00**

पुस्तकोपलब्धिस्थाने

देववाणी-परिषद्, दिल्ली
६, वाणी-विहारः
नयी दिल्ली-११००५९

सुधाकमल-ग्रन्थालयः
२६४, उत्तरी गाँधी कालौनी
मुजफ्फरनगर (उ०प्र०)



लेखक:

डॉ० सी० आर० (शास्त्रपुरम् रामकृष्ण) स्वामिनाथन्
'कार्यकारः', एम० ए० (न्याय-साहित्यशास्त्रयोः), साहित्याचार्यः,
एम० लिट्०, पीएच० डी०

जन्म-तिथिः : १०-३-१९२७

जन्मस्थानम् : पालघाट (केरल)

रचनाः (१) जानकीहरणम् (Critical Edition & Study)
(२) गीताभाष्यों का तुलनात्मक अध्ययन (पीएच० डी० शोधप्रबन्धः)
(३) श्रीबदरीशसुप्रभातम् (४) कर्णभूषणम्
(५) Religious trends in Nepal History ('Heritage of Nepal' - ग्रन्थे सहलेखनम्)
(६) शंकरविजयम् (मलयालम-नेपालीभाषयोः)
(७) प्रकीर्णाः कविताः शोधलेखाश्च ।

वृत्तिः : शासकीयसेवा । भारतशासनस्य शिक्षामन्त्रालये सहायक-परामर्शदाता (संस्कृते) ।

आवास-संकेतः 5/30 W. E. A., करौल बाग नई दिल्ली-110005.